मधुवातादिऋक्त्रयवेत्ता । यथा,—

"त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित् ॥"

इति पङ्क्तिपावनवर्णने मार्कण्डेयपुराणम् । ३१ । २३ ॥ तद्व्रतञ्च । तद्व्रताचरणेन यस्तदध्यायी सोऽपि । इति विज्ञानेश्वरः ॥ * ॥ श्राद्धे त्रिवारमधुशब्दोच्चारणविधिर्यथा,—

"गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृति-
पूर्व्विकाम् ।
मधुवाता इति त्र्यृचं मध्वित्येतत् त्रिकं जपेत् ॥"

इति श्राद्धतत्त्वे मिताक्षराधृतपारस्करवचनम् ॥)

त्रिमार्गी, स्त्री, त्रयाणां मार्गाणां समाहारः । त्रिपथम् । इति व्याकरणम् ॥

त्रिमुकुटः, पुं, (त्रीणि मुकुटानीव शृङ्गाण्यस्य ।) त्रिकूटपर्व्वतः । इति हेमचन्द्रः । ४ । ९६ ॥

त्रिमुखः, पुं, (त्रीणि मुखानि यस्य ।) बुद्धविशेषः । इति हेमचन्द्रः । १ । ४१ ॥

त्रिमुखा, स्त्री, (त्रीणि मुखानि यस्याः ।) बुद्धदेवताभेदः । सा मायादेवी । तत्पर्य्यायः । मारीची २ वज्रकालिका ३ विकटा ४ वज्रवाराही ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेषः ॥

त्रिमूर्त्तिः, पुं, (तिस्रो मूर्त्तयो यस्य ।) बुद्धः । इति त्रिकाण्डशेषः ॥ त्रि, ब्रह्मविष्णुशिवाख्यमूर्त्तित्रयवान् । यथा,—

"त्रिमूर्त्तये सर्गस्थितिविलयकर्म्माणि तनुते ।"
इति गङ्गेशोपाध्यायः ॥

(यथाच कुमारे । २ । ४ ।
"नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ॥")

त्रियष्टिः, पुं, (त्रिषु वातपित्तकफात्मकेषु दोषेषु यष्टिरिव तन्नाशकत्वात् ।) श्वेतपर्पटी । इति रत्नमाला ॥

त्रियामकं, क्ली, (त्रीन् धर्म्मार्थकामरूपान् त्रिवर्गानपि यमयति नाशयतीति । यम+णिच्+ण्वुल् ।) पापम् । इति शब्दमाला ॥

त्रियामा, स्त्री, (त्रयो यामाः प्रहरा यस्याः ।
"त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ॥"
इति वचनात् आद्यन्तयोरर्द्धयामयोर्दिवाकालत्वेन दिनप्रायत्वात् तथात्वम् ।) रात्रिः । (यथा, हरिवंशे । १०२ । २९ ।
"स मत्तो बलिनां श्रेष्ठो रराजाघूर्णिताननः ।
शैशिरीषु त्रियामासु यथा खेदालसः शशी ॥"
त्रिप्रहरान्विते, त्रि । यथा, गोः रामायणे । २ । १० । १७ ।
"त्रियामापि भृशार्त्तस्य सा रात्रिरभवत्तदा ।
तथा विलपतस्तस्य राज्ञो वर्षशतोपमा ॥")
हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥ यमुना । नीली । श्यामात्रिवृत् । इत्युणादिकोषः ॥

त्रियुगः, पुं, (त्रीणि युगानि सत्यत्रेताद्वापररूपाणि आविर्भावकालोऽस्य ।) विष्णुः । यथा, भागवते । ७ । ९ । ३८ ।
"इत्थं नृतिर्य्यगृषिदेवझषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान् ।
धर्म्मं महापुरुष ! पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥"
"एकस्त्वमेव इत्यादिभिरष्टभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्त्वोपाधितो न स्वत इति तदुपसंहरति इत्थमिति विभावयसि पालयसि हंसि घातयसि । कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः यतस्त्रिष्वेव युगेष्वाविर्भावात् स एवम्भूतस्त्वं त्रियुग इति प्रसिद्धः ।" इति तट्टीकायां श्रीधरस्वामी ॥ (तथा च तत्रैव । ३ । २४ । २९ ।
"स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् ।
विविक्त उपसंगम्य प्रणम्य समभाषत ॥"
वसन्तप्रावृट्शरद्रूपकालत्रये, क्ली । यथा, वाजसनेयसंहितायाम् । १२ । ७५ ।
"या ओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगं पुरा ॥"
"युगशब्दः कालवाची । त्रयाणां युगानां समाहारस्त्रियुगं त्रिकालं वसन्ते प्रावृषि शरदि च ।" इति तद्भाष्ये महीधरः ॥ सत्यत्रेताद्वापररूपयुगत्रयम् । इति ऋग्वेदस्य । १० । ९७ । १ । भाष्ये सायनः ॥ षडैश्वर्य्यशालिनि, त्रि । यथा, महाभारते । ३ । ८९ । ५ ।
"त्रियुगौ पुण्डरीकाक्षौ वासुदेवधनञ्जयौ ॥"
"त्रियुगौ धर्म्मस्य भार्य्यायां मूर्त्तिसंज्ञायां सत्ययुगेऽवतीर्णौ नरनारायणौ तावेव द्वापरान्ते केशवार्ज्जुनौ इति पुराणपुरुषावेतौ नासदादिवन्मानुषाविति भावः । यद्वा, त्रीणि युगानि युगलानि षडैश्वर्य्याणि भगसंज्ञानि वा षड्ज्ञानि वा ययोस्तौ त्रियुगौ ॥" इति तट्टीकायां नीलकण्ठः ॥)

त्रियूहः, पुं, कपिलाश्वः । इति हेमचन्द्रः ॥ (यथा, अश्ववैद्यके । ३ । १०२ ।
"नीलो नीलक एवाश्वस्त्रियूहः कपिलः
स्मृतः ॥")

त्रिरात्रं, क्ली, रात्रित्रयम् । तिसृणां रात्रीणां समाहारः । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ (यथा, मनुः । ४ । ११९ ।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं
स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥")

त्रिरेखः, पुं, (तिस्रो रेखा यत्र ।) शङ्खः । इति हेमचन्द्रः । ४ । २७२ ॥

त्रिलवणं, क्ली, (त्रयाणां लवणानां समाहारः । पात्रादित्वात् न ङीप् ।) सैन्धवं विड़ं रुचकं मिलितैतल्लवणत्रयम् । इति राजनिर्घण्टः ॥ ("सिन्धुसौवर्च्चलञ्चैव विड़ं सामुद्रमौद्भिदम् ।
एक-द्वि-त्रि-चतुः-पञ्च लवणानि क्रमादिह ॥"
इति वैद्यकपरिभाषा ॥)

त्रिलोकी, स्त्री, त्रयाणां लोकानां समाहारः । ("द्विगोः ।" ४ । १ । २१ । इति ङीप् ।) लोकत्रयम् । यथा, भूर्लोकः भुवर्लोकः स्वर्लोकश्च । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ (यथा, भागवते । १ । ५ । ७ ।
"त्वं पर्य्यटन्नर्क इव त्रिलोकी-
मन्तश्चरो वायुरिवात्मसाक्षी ॥")

त्रिलोकेशः, पुं, (त्रयाणां लोकानामीशः ।) सूर्य्यः । इति शब्दचन्द्रिका ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ८२ ।
"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा
हरिः ॥"
"त्रयो लोकास्तदात्मानः स्वेषु स्वेषु कर्म्मसु वर्त्तन्ते इति त्रिलोकेशः ॥" इति शाङ्करभाष्यम् ॥ महादेवः । यथा, महाभारते । १४ । ८ । २७ ।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ॥"
त्रिलोकाधिपतौ, त्रि । यथा, तत्रैव । ३ । ८४ । ११७ ।
"अभिगम्य त्रिलोकेशं वरदं विष्णुमव्ययम् ।
अश्वमेधमवाप्नोति विष्णुलोकञ्च गच्छति ॥")

त्रिलोचनः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि लोचनानि यस्य ।) शिवः । इत्यमरः ।१।१।३४॥ (यथा, कुमारे । ५ । ७२ ।
"वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि ! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥"
लोचनत्रयविशिष्टे, त्रि । यथा, माघे । १ । ७० ।
"स बाल आसीद्वपुषा चतुर्भुजो
मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ॥")

त्रिलोचना, स्त्री, (त्रीणि लोचनानि यस्याः ।) बुद्धदेवीभेदः । इति त्रिकाण्डशेषः । दुर्गा च ॥ (सा च गायत्रीस्वरूपिणी । यथा, देवीभागवते । १२ । ६ । ६७ ।
"त्रिकालज्ञानसम्पन्ना त्रिवली च त्रिलोचना ॥")

त्रिलोचनाष्टमी, स्त्री, (त्रिलोचनाय त्र्यम्बकपूजायै या अष्टमी ।) शैवचान्द्रज्यैष्ठकृष्णाष्टमी । यथा,—
"ज्यैष्ठे मासि नृपश्रेष्ठ ! कृष्णाष्टम्यां त्रिलोचनम् ।
यः पूजयति देवेशमीशलोकं स गच्छति ॥"
इति संवत्सरकौमुदीधृतभविष्यपुराणवचनम् ॥ अपि च ।
"ज्येष्ठे मासासिते पक्षे अष्टम्याञ्च महेश्वरि ! ।
शिवार्च्चने च तल्लोकं लभते नात्र संशयः ॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥

त्रिलोचनी, स्त्री, (त्रीणि लोचनानि यस्याः ।) दुर्गा । इति पुराणम् ॥

त्रिलोहकं, क्ली, (त्रयाणां लोहकानां समाहारः ।) सुवर्णं रजतं ताम्रं एतद्धातुत्रयम् । इति राजनिर्घण्टः ॥

त्रिलोही, स्त्री, (त्रीणि लोहानि साधनत्वेनास्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) मुद्राविशेषः । यथा, अथ मल्लिका द्वितयीय त्रिलोही मुद्रा निरूप्यते ।
"सोमसूर्य्याग्निरूपाः स्युर्वर्णा लौहत्रयं तथा ।
रौप्यमिन्दुः स्मृतो हेम सूर्य्यस्ताम्रो हुताशनः ॥
लौहभागाः समुद्दिष्टाः स्वरादचरसंख्यया ।